# जैनमुनिश्रीरामभद्राचार्यकृतप्रबुद्धरौहिणेयनाटकेऽलङ्कारयोजना

**रविकुमारदुबे**
शोधच्छात्रः राष्ट्रियसंस्कृतसंस्थानम्भोपालपरिसरः भोपालम्

Received: January 20, 2019 Accepted: February 28, 2019

लोके अलङ्कारशब्दस्य प्रयोगः भूषणम्, आभूषम् इति अर्थे मुख्यतया दृश्यते। यथा शब्दकोषकारो लिखति -''अलङ्कारः (अलम्+कृ+घञ्) 1. सजावट, सजाने या अलङ्कृत करने की क्रिया , 2. आभूषण (आलं. सेभी) अलङ्कारः स्वर्गस्य - विक्रम .1, 3. अलंकार जिसके शब्द अर्थ, तथा शब्दार्थ के अनुसार तीन भेद है। 4. काव्य के गुण दोष बताने वाला शास्त्र[1]।''इति।

नाट्याचार्यो भरतमुनिः अलङ्कारान् प्रतिपादयामास। यथा -

''उपमा रूपकं चैव दीपकं यमकं तथा।

अलङ्कारास्तु विज्ञेयाश्चत्वारो नाटकाश्रयाः[2]।।नाट्यशास्त्रम् 1/7/43इति। नैके आचार्याः विभिन्नरूपेण अलङ्कारान् स्वीकृतवन्तः। अतः अलङ्काराणां संख्याविषयेमतभेदःविद्यते। यथा - भरतमुनेश्चत्वार एवालङ्काराः। वामनस्य त्रयस्त्रिंशत्, दण्डिनः पञ्चत्रिंशत् , भट्टिकवेरष्टात्रिंशत्, भामहस्य ऊनचत्वारिंशत् , उद्भटस्य चत्वारिंशत् रूद्रटस्य द्विपञ्चाशत्, मम्मटस्य अष्टाषष्टिः विश्वनाथस्यापि चतुरशीतिः, जयदेवस्य शतम्, अप्पयदीक्षितस्य चतुर्विंशत्यधिकशतम्। इति।

दशमपच्छिदे अलङ्कारस्वरूपनिरूपणप्रसङ्गे कविराज-विश्वनाथो लिलेख -

''शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोलङ्कारास्तेऽङ्गदादिवत्[3]।।'' 10/1

यथा अङ्गदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति तथानुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरूपकारकाः। अलङ्कारा अस्थिरा इति नैषां गुणवदावश्यकी स्थितिः।

अलङ्कारशब्दस्य व्युत्पत्तिद्वयं स्वीकुर्वन्ति आलङ्कारिकाः। अलङ्करोति शब्दार्थानिति अथवा अलङ्क्रियते अनेन इति। अलङ्कारः सौन्दर्यवाचकः इति स्वीकरोति वामनाचार्यः। यथा -

''काव्यं ग्राह्यमलङ्कारात्' 'सौन्दर्यमलङ्कारः[4]'' इति का.सू. 1/1/1-2

काव्यप्रकाशकारो मम्मटो जग्रन्थ-

''उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।[5] 8/67 इति।

ये वाचकवाच्यलक्षणाङ्गातिशयमुखेन मुख्यं रसं सम्भविनमुपकुर्वन्ति ते कण्ठाद्यङ्गानामुत्कर्षाधानद्वारेण शरीरिणोऽपि उपकारका हारादय इवालङ्काराः। अलङ्कारस्य मुख्यतया त्रयो भेदाः सन्ति -

शब्दालङ्काराः

अर्थालङ्काराः

शब्दार्थोभयालङ्काराः अथवा उभयालङ्काराः इति।

प्रबुद्धरौहिणेयनामके[6]नाटकेऽस्मिन् श्लोकेषु केचन अलङ्काराः दृश्यन्ते। तेषामुपस्थापनमिह क्रियते नाटकानुसारेण अलङ्कारलक्षणेन सह। नाटकेऽस्मिन् केचन अलङ्काराः इत्थं सन्ति। यथा -

उपमा, उत्प्रेक्षा, काव्यलिङ्गम्, विभावना, अर्थान्तरन्यासः, अनुप्रासः, यमकम्, सङ्करः, विशेषोक्तिः इति।

**उपमालङ्कार**

अत्र सर्वाधिकप्रयुक्तः अलङ्कारः उपमा विद्यते। उपमा नाम उदाहरणम्। चन्द्रालोककारमतेन उपमायाः लक्षणमुदाहरणञ्च इत्थं विद्यते -

''उपमा यत्र सादृश्य-लक्ष्मीरुल्लसति द्वयोः।
हंसीव कृष्ण ! ते कीर्तिः स्वर्गङ्गामवगाहते[7]।। 5/11'' इति।

द्वयोः उपमानोपमेययोः सादृश्यलक्ष्मीः साधारणधर्मसौन्दर्यं यत्र उल्लसति वाच्यतया तिष्ठति तत्रोपमालङ्कारः। हंसीत्यादि उदाहरणम्। यथा-कृष्ण ! ते तव कीर्तिः हंसी इव स्वर्गङ्गां स्वर्णदीम् अवगाहते आलोडयति।

साहित्यदर्पणकारमतेन उपमायाः लक्षणम् -

''साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः।
सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च
उपमेयं चोपमानं भवेत् वाच्यमियं पुनः[8]।। 10/15

वाक्यस्य ऐक्ये एकत्वे (एकवाक्ये इत्यर्थः) द्वयोः उपमानोपमेययो अवैधर्म्यं साम्यं चेत् उपमालङ्कारो भवति। यदि सामान्यधर्मः सादृश्यहेतुः गुणक्रियादिः औपम्यवाचि इवादिपदम् उपमेयम् उपमाश्रयः (यस्यै उपमा दीयते तत् ) (उपमानम् उपमीयते येन तत् ) सादृश्यप्रतियोगि इत्यर्थः , वाच्यम् अभिधाशक्त्या उक्तं स्यात् तदा पूर्णोपमा। इयं पुनरेकद्वयादिलोपे बहुभेदीति सारांशः।

प्रबुद्धरौहिणेये नाटके आधिक्येन उपमालङ्काराणां दर्शनं भवति। कानिचन उदाहरणानि अत्र निरूप्यन्ते -

''केचिद्वेल्लितवल्लभाभुजलताश्लेषोल्लसन्मन्मथाः
केचित्प्रीतिरसप्ररूढपुलकाः कुर्वन्ति गीतध्वनिम्।
केचित्कामितनायिकाधरदलं प्रेम्णा पिबन्त्यादरात्
किञ्चित्कूणितलोललोचनपुटाः पद्मं द्विरेफा इव।। 1/10
उत्कृत्तदन्तिदशनद्युतिमत्प्ररोह-
द्वन्धाश्रितभ्रमरराजिविराजिमध्यम्।
आभाति केतकदलं त्रिजगद्विजित्य
प्रोत्तम्भितं विजयपत्रमिव स्मरेण[9]।। 1/11'' इति।

अस्मिन् श्लोकद्वये 'पद्मं द्विरेफा इव ' 'विजयपत्रमिव' इति उदाहरणेन उपमायाः स्वरूपं स्पष्टं भवति। द्विरेफो नाम भ्रमरः यथा द्विरेफाः आदरात् पुष्पाणां रसं पिबन्ति , तथैव केचित् कामिताः नायिकाधरदलं प्रेम्णा पिबन्ति किञ्चित्कूणितलोललोचनपुटाः इति। तथा च आभाति केतकदलं स्मरेण विजयपत्रमिव।

अनेन प्रकारेण प्रकृतसन्दर्भे उपमा स्पष्टतया प्रतिभाति।

''येनामी मम निर्भया भयजुषः शश्वद्धना निर्धनाः
सौस्थ्योल्लासवशाद्विकाशवदना दारिद्र्यदीनाननाः।
हारं हारमहर्निशं धनचयानित्थं जनाश्चक्रिरे
सोऽयं किं पशुवन्नियम्य विधृतः प्रागस्करस्तरकरः[10]।।'' 5/8
''इयत्कालं कूट स्वपितृवचनग्रस्तमनसा
मयाऽपास्तं जैनं वचनमनिशं चौर्यरतिना।
हहापास्याभ्राणि प्रवररसपूर्णानि तदहो !
कृता काकेनेव प्रकटकटुनिम्बे रसिकता।। 6/34
दत्तोह्निर्द्विषतांशिरस्यपतुलं नीतं प्रकाशं कुलं
भूम्ना शौर्यगुणेन विस्मयपदं नीताः प्रवीराः क्षितौ।
लीनं वीरजिनेन्द्रपादकमले चेतश्चिरं हंसव
त्तत्किञ्चित्प्रियमस्त्यतः परमहो ! यत्प्रार्थये पार्थिव[11]।।'' 6/41

एतेषु श्लोकेषु 'पषुवन्नियम्य विधृतः , ' कृता काकेनेव प्रकटकटुनिम्बे रसिकता ' ' वीरजिनेन्द्रपादकमले चेत श्चिरं हंसवत् ' इतिवाक्यैः उपमालङ्कारः प्रकटीभवति। अनेन प्रकारेण उपमालङ्काराणां निदर्शनं कृतं यथाग्रन्थम्।

ततः परम् उत्प्रेक्षालङ्कारस्य निरूपणं क्रियते।

उत्प्रेक्षालङ्कारः - उत्प्रेक्षालङ्कारविषये चन्द्रालोककारस्य मतमित्थं विद्यते-

''उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नुतिं विना।
त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी[12]।।5/29

यत्र निह्नुतिम् अपह्नवं विना। (उपमेयस्य उपमानेन साम्यसम्भावनायै) हेत्वादिः (हेतुः फलं वस्तु) उन्नीयते तर्क्यते तत्र उत्प्रेक्षालङ्कारो ज्ञेयः। उत्कृष्टम् प्रेक्षणम् उत्प्रेक्षा। यथा शशी चन्द्रः नूनं निश्चयेन तव मुखस्य श्रीः तस्याः कृते त्वदास्यशोभालाभाय पद्मैः सह वैरायते वैरं करोति।

अत्र मिथ्यैव चन्द्रस्य वस्तुनः मुखेन वस्तुना साम्यफलप्राप्तये पद्मैर्वस्तुभिः सह वैरं हेतुं नूनम् इति उत्प्रेक्षाव्यञ्जकषब्देन उत्प्रेक्षते कविरिति उत्प्रेक्षालङ्कारः सिध्यति।

केचन उत्प्रेक्षाव्यञ्जकाः शब्दाः सन्ति। तद्यथा -

'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः।
उत्प्रेक्षाव्यञ्जकाः शब्दा इवशब्दोऽपि तादृशः।

यत्र मन्ये, शङ्के, ध्रुवं, प्रायः, नूनम् प्रभृतिशब्दाः भवन्ति श्लोके तत्र उत्प्रेक्षालङ्कारो निगद्यते। तथैव इव शब्दोऽपि भवति। इवादिकपदाभावे गूढोत्प्रेक्षालङ्कारो भवति। तद्यथा चन्द्रालोककारेण अवादि -

''इवादिकपदाभावे गूढोत्प्रेक्षां प्रचक्षते।
त्वत्कीर्तिर्विभ्रमश्रान्ता विवेष स्वर्गनिम्नगाम्[13]।।5/30

अत्र पूर्वतः उत्प्रेक्षालक्षणं सर्वमनुवर्तते। 'मन्ये' प्रभृतयो ये उत्प्रेक्षाव्यञ्काः शब्दा उक्तास्तेषामभावेऽपि अपह्नुतिं विना उपमेयनिरासमन्तरेणैव उपमानसाम्यकल्पनार्थं यत्र हेत्वादिः उन्नीयते तत्र गूढोत्प्रेक्षालङ्कारं प्रचक्षते आलङ्कारिकाः। मतान्तरे प्रतीयमानोत्प्रेक्षेयम्। यथा - विभ्रमश्रान्ता त्वत्कीर्तिः (अप्सरायमाणा) स्वर्गनिम्नगङ्गां स्वर्गगङ्गां विवेश इति मन्ये। तत्र स्नातीवेति यावत्।

साहित्यदर्पणकारमतेन उत्प्रेक्षालङ्कारस्य लक्षणमित्थं विद्यते -

''भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता।। (10/40)
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि[14]।। (10/41) इति।

प्रकृतस्य उपमेयस्य परात्मना उपमानात्मना उपमानरूपेण सम्भावनामात्रम् उत्प्रेक्षालङ्कारः। सा उत्प्रेक्षा प्रथमं वाच्या द्वितीयम् प्रतीयमाना इति (नामतः) द्विधा मता। इवादिपदप्रयोगे वाच्या स्यात्। तदप्रयोगे परा प्रतीयमाना स्यात्। पुनः द्वयोः वाच्याप्रतीयमानयोः यत् उत्प्रेक्ष्यं तद्धि जातिः गुणः क्रिया द्रव्यम् इत्येवम् अग्रे बहवो भेदाः सन्ति।

मुख्यरूपेण उत्प्रेक्षायाः द्वौ भेदौ विद्येते - वाच्या प्रतीयमाना च। इव -यथा-मन्ये शङ्के-ध्रुवमित्यादिपदानामुपस्थितौ वाच्या भवति। तेषां पदानामभावे प्रतीयमाना भवति।

सम्प्रति प्रबुद्धरौहिणेयनाटकानुसारेण उत्प्रेक्षालङ्कारस्य उदाहरणानि कानिचन प श्यामः। यथा-

''यदेते पूर्लोकाः प्रकटविभवापास्तधनदा
गतव्रीडाः क्रीडारसमनुसरन्ति प्रियसखाः।
मदोन्मादज्ञातस्वपरजनभावव्यतिकरा-
स्तदेतन्मन्येऽहं मम सुकृतराशेर्विलसितम्[15]।। 1/12 इति।

एते पूर्लोकाः प्रकटविभवापास्तधनदा गतव्रीडाः प्रियसखाः मदोन्मादज्ञातस्वपरजनभावव्यतिकराः क्रीडारसमनुसरन्ति मन्ये अहम् एतत् सुकृतराशेर्विलसितं मम इति श्लोकाशयः। अत्र 'मन्ये' इति पदेन उत्प्रेक्षालङ्कारो ज्ञायते।

''शूचीभेद्यतमिश्रकुण्डलिकुलं विश्वाशनव्याकुलं
नीत्वा भासमशेषविश्वविजयी भ्रान्त्वा च विश्वं वियत्।
नूनं श्रीप इवाधुना विधुरयन्नम्भोजिनीं सर्वतः
कर्तुं स्नानमितो जगाम चरमाम्भोधिं ग्रहग्रामणीः। 2/1
आरामैः कमठायितं गुरुगृहैः पोतायितं मेदुर -
क्ष्माभृद्भिर्जलकुञ्जरायितमुडुव्यूहेन मत्स्यायितम्।
वातोद्धूतसमुद्धरध्वजपटैः सर्पायितं स्वैरिणी -
श्रेणीभिर्जलमानुषीयितमहो ! नैशान्धकाराम्बुधौ[16]।। 2/2

अत्रापि 'नूनं श्रीप इवाधुना विधुरयन्नम्भोजिनीं सर्वतः ' इति वाक्येन उत्प्रेक्षालङ्कारः प्रतिभाति। द्वितीय श्लोके गूढोत्प्रेक्षा विद्यते।

**काव्यलिङ्गम्-**

''स्यात् काव्यलिङ्गं वागर्थो नूतनार्थसमर्थकः।
जितोऽसि मन्दकन्दर्प ! मच्चित्तेऽस्तित्रिलोचनाः[17]।। 5/38

यत्र वागर्थः शब्दार्थः (पदार्थ-वाक्यार्थान्तररूपः हेतुभूतः वाच्यतया) नूतनस्य नवीनस्य अर्थस्य समर्थकः सम्पादकः स्यात्। अत्र काव्यस्य कविकर्मणो लिङ्गं द्योतकं तन्नामालङ्कारः स्यात्। यथा मन्दश्चासौ कन्दर्पः तत्सम्बुद्धौ हे मन्दकन्दर्प ! स्वल्पबुद्धे कामदेव ! त्वं मया जितः पराभूतः असि वर्तसे यतो हि मम चित्ते मच्चिते त्रीणि लोचनानि यस्यासौ त्रिलोचनः त्रिनेत्रशालीशिवः अस्ति विद्यते। येन त्रिनेत्रेण त्वं दग्धः।

''हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते[18]।'' (10/62)

हेतोः कारणस्य वाक्यं च पदं च तयोः अर्थौ वाक्यपदार्थौ तयोर्भावः वाक्यपदार्थत्वं तस्मिन् सति काव्यलिङ्गम् अलङ्कारः निगद्यते कथ्यते।

अर्थात् यदि अलङ्कारस्य समर्थककारणं वाक्येषु स्यात् तर्हि काव्यलिङ्गालङ्कारो भवति।

इदानीं प्रकृतनाटकाधारेण काव्यलिङ्गालङ्कारस्य उदाहरणानि प्रस्तूयन्ते। यथा -

''चञ्चच्चन्द्रमरीचयो मधुमदः स्निह्यत्सुहृत्सङ्गमः
श्रीखण्डं मलयानिलः पिकवधूसोत्कण्ठकण्ठध्वनिः।
उन्मीलन्नवपाटलीपरिमलः प्रेयस्विनीविभ्रमाः
अष्टौ ते खलु हर्षवर्षविधयः श्लाघ्याःसुराणामपि[19]।। 1/3

चञ्चच्चन्द्रमरीचयो मधुमदः स्निह्यत्सुहृत्सङ्गमः श्रीखण्डं मलयानिलः पिकवधूसोत्कण्ठकण्ठध्वनिः , उन्मीलन्नवपाटलीपरिमलः प्रेयस्विनीविभ्रमाः एते अष्टौ हर्षवर्षविधयः सुराणामपि श्लघ्याः सन्ति। अत्र हर्षवर्धनस्य अष्टौ कारणानि दत्तानि सन्ति अतः काव्यलिङ्गालङ्कारो विद्यते।

तथा च रौहिणेयमवलोक्य अभयकुमारो जगाद -

''आबद्धोरुयुगो युगायतभुजः पिङ्गस्फुरल्लोचनो
रूक्षाग्रोद्बुषितातिकर्कशकचः क्रूरः करालाकृतिः।
वक्रभ्रकुटिसंपुटप्रकटितान्तःक्रोधबोधोद्धुरः
संपूर्णाखिलचौरलक्षणधरश्चौरोऽयमन्यो नहि[20]।। 5/14

'संपूर्णाखिलचौरलक्षणधरः' अयं चौरः अन्यो नहि ' अत्रापि चौरस्य लक्षणानि दत्तानि सन्ति ततश्च निरूपयति ' अयं चौर एव नान्यः इति। अत एव अत्रापि काव्यलिङ्गालङ्कारो विद्यते।

**विभावनाः** विभावनालङ्कारविषये चन्द्रालोककारः अनेन प्रकारेण मतं प्रदर्शयति -

''विभावना विनापि स्यात् कारणं कार्यजन्म चेत्।
पश्य लाक्षारसाऽसिक्तं रक्तं त्वच्चरणद्वयम्[21]। 5/77

चेत् यदि कारणं हेतुं विनापि विनैव (अत्र एवार्थे अपि ) कार्यस्य जन्म उत्पत्तिः स्यात् तदा विभावना नाम अलङ्कारो ज्ञेयः। इति लक्षणम्। उदाहरणं यथा - लाक्षायाः रसः लाक्षारसः तेन न सिक्तम् असिक्तम् तव चरणद्वयं त्वच्चरणद्वयम् रक्तं रक्तवर्णम् अस्ति - इति पश्य निरीक्षस्व। अत्र लाक्षारससेको हेतुः रक्तत्वे चरणद्वयस्य। तदभावेऽपि चरणद्वयं रक्तम् अस्ति इति विना कारणं कार्यस्य जन्म दृष्यते इति विभावनालङ्कारः स्फुटम् अस्ति।

विभावनालङ्कारस्य प्रबुद्धरौहिणेयनाटकाधारेण इदानीं प्रस्तूयन्ते। तद्यथा -

''किं श्रृङ्गारमयी ? किमु स्मरमयी ? किं हर्षलक्ष्मीमयी ?
किं पीयूषमयूखदीधितिमयी ? किं पुण्यवीथीमयी ?
किं वा विष्टपसृष्टिसौष्ठवमयी ? किं रूपसंपन्मयी ?
नो जाने विधिनेयमम्बुजमुखी कैश्चिद्दलैर्निर्मिता[22]।। 1/20 इति

अस्मिन् श्लोके उच्यते 'नो जाने विधिना इयम् अम्बुजमुखी कै श्चित् दलैः निर्मिता ' इति। अत्र कारणं स्पष्टं नास्ति परन्तु अम्बुजमुखी विधिना निर्मिता इति स्पष्टं जातम्। अतः कारणं विना कार्योत्पत्तिःदृश्यते। एतल्लक्षणं विभावनायामेव सङ्गच्छते अतोऽत्र विभावनालङ्कारो विद्यते।

**अर्थान्तरन्यासः-** चन्द्रालोककारो व्यनक्ति अर्थान्तरन्यासस्य लक्षणमित्थम्

''भवेदर्थान्तरन्यासोऽनुषक्तार्थान्तराभिधा।
हनूमानब्धिमतरद् दुष्करं किं महात्मनाम्[23]।।

अन्योऽर्थः अर्थान्तरम् अनुषक्तं च तत् अर्थान्तरम् अनुषक्तार्थान्तरं तस्य अभिधा कथनम् अर्थान्तरन्यासः अलङ्कारो भवेत् स्यात् इति अलङ्कारलक्षणम्। अर्थात् मुख्यार्थेन सम्बद्धस्य अर्थान्तरस्य अन्यस्य अर्थस्य कथनम् एव अर्थान्तरन्यासालङ्कारो भवति। सामान्येन वि शेषस्य समर्थनं विशेषेण सामान्यस्य समर्थनम् इत्यादिबहुभेदोऽस्यान्यत्र साधर्म्यवैधर्म्याभ्याम्। तत्रैवान्तर्भूतं ज्ञेयम्। उदाहरणं यथा -

हनूमान् मारूतिः अब्धिम् अतरत् पुल्लुवे उल्ललंघे वा। (सत्यमेव इदम्) महात्मनाम् महान् आत्मा येषां ते महात्मानः महाबलिनः तेषाम् महाबलषालिनां दुष्करं कठिनं किम् ? न किमपि इत्यर्थः।

कविराजविश्वनाथेन प्रौक्तं यत्

''सामान्यं वा विशेषेणविशेषस्तेन वा यदि।
कार्यं च कारणेनेदं कार्येण च समर्थ्यते।
साधर्म्येणेतरेणार्थान्तरन्यासाऽष्टधा ततः[24]।। 10-61, 62

यत्र साधर्म्येण इतरेण वैधर्म्येण वा यदि सामान्यं वि शेषेण, विशेषो वा सामान्येन, कार्यं च कारणेन, कारणं च कार्येण समर्थ्यते सम्बलीक्रियते तत्रैव अर्थान्तरन्यासोऽलङ्कारः, अष्टधा अष्टप्रकारको भवति।

नाटकेऽस्मिन् अर्थान्तरन्यासस्योदाहरणं प्राप्यते।

यथा-''निःस्वाननानि यत्पृष्ठे स्फोटितानि सहस्रशः।
वित्रस्यति स किं क्वापि कांस्यतालैः क्रमेलकः[25]।। 6/23''

यद्यपि अत्र सामान्यदृष्टया क्रमेलकस्य वर्णनं प्रतिभाति परन्तु वस्तुस्थितिः तथैव नास्ति। उष्ट्रस्य उदाहरणेन रौहिणेयविषये निगद्यते। यतोहि महामात्यः अभयकुमारः राजप्रासादे स्वर्गस्य निर्माणं कारयित्वा रौहिणेयं संस्थापयति नृपतिरूपेण यथा रौहिणेयः दुष्कृत्यं स्वस्य स्वीकुर्यात् तथा कारितवान् अमात्यः। परन्तु अयं प्रबुद्धश्चौरः तदापि नोक्तवान् स्वस्य विषये 'अहं चौर इति '। अतः सर्वे चिन्तिताः कृताश्चोपायाः विफलताम् अगच्छन्। एतस्मिन्नेव प्रसङ्गे प्रतीहारो वदति - मन्त्रिमण्डलप्रकाण्ड ! 'निस्वाननानि' इति श्लोकम्। यथा यस्य क्रमेलकस्य पृष्ठे प्रस्तरखण्डाः सहस्रशः स्फोटिताः सन्ति प्रक्षिप्ताः सन्ति स किं कांस्यतालैः उद्वेगं प्राप्स्यति। अर्थात् अयं चौरः स्वयमेव महाधूर्तः वञ्चकश्च। तेन सह वञ्चना सम्भाव्यते किम् ? कदापि न भवितुमर्हति। अत एव अभयकुमारो वदति -

''प्रपञ्चतुरोऽप्युच्चैरहमेतेन वञ्चितः।
वञ्च्यन्ते वञ्चनादक्षैर्दक्षा अपि कदाचन[26]।। 6/24'' इति।

अनेन प्रकारेण सन्दर्भितश्लोके अर्थान्तरन्यासालङ्कारो विद्यते अर्थान्तरस्य न्यासः उपस्थापनं क्रियते अनेन श्लोकेन।

**विशेषोक्तिः**- ''सति हेतौ फलाभावे विशेषोक्तिस्तथा द्विधा ''[45]इति (10/67) साहित्यदर्पणकारेण अभाणि। हेतौ कारणे सति विद्यमानेऽपि। फलस्य कार्यस्य अभावे अविद्यमाने विशेषोक्तिः अलङ्कारो भवति। सा विभावनावत् उक्तनिमित्ता अनुक्तनिमित्ताचेति द्विधा।

कानिचन उदाहरणानि विलसन्त्यत्र ग्रन्थे। तद्यथा -

''रात्रौ यत्र कपाटसम्पुटखटत्कारोऽपि हक्काध्वनिः
पूत्कारप्रसरः परः कलकलो हाहेति चाक्रन्दितम्।
प्राकारे विशिखामुखे नृपपथे शृङ्गाटके चत्वरे -
ऽगच्छं तत्र न तस्करं परमहं पश्यामि पश्यन्नपि[27]।। 3/31'' इति।

कीनाशः अर्थात् नगररक्षकः सर्वत्र भ्रमति परन्तु तं तस्करं पश्यन्नपि न पश्यति। कारणे विद्यमानेऽपि कार्यं न सम्पद्यते। अतोऽत्र विशेषोक्त्यलङ्कारो विद्यते।

''दुरास्कन्दः परास्कन्दी राजाज्ञातिबलीयसी।
लोकोऽप्यस्तोकशोकस्तन्न जाने किं भविष्यति।। 4/2''

''प्रभुत्वं न्यायसम्पन्नं सदा दानाद्भुताः श्रियः।
शौर्यं सद्बुद्धिसंयुक्तं दुर्लभं त्रयमप्यदः[28]।। 4/13 इति

उभयोः श्लोकयोरपि कारणानि दर्शितानि परन्तु कार्याणि न दृश्यन्ते। अतो लक्षणानुसारेण विशेषोक्त्यलङ्कारो विद्यते।

**अनुप्रासः**- ''वैषम्येऽपि स्वरस्यानुप्रासः स्याच्छब्दसाम्यभृत्।
समासदत्सादितेति पद्यभाग उदाहृतिः।

इति चन्द्रालोककारेण निगदितम्। अनुप्रासस्य पञ्च भेदाः सन्ति -

छेक - वृत्ति - श्रुति - लाटान्त्यानुप्रासा इति।

''स्वरव्यञ्जनसन्दोहव्यूहा मन्दोहदोहदा।

साहित्यदर्पणकारो जगाद -

''अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् [29]।।'' (10/3)

स्वरस्य वैषम्येऽपि अशब्दतः स्वरस्य साम्येऽपि यत् शब्दानां साम्यं समता स हि अनुप्रासः शब्दालङ्कारः स्यादेव।

प्रबुद्धरौहिणेयनाटकाधारेण अनुप्रासस्य कानिचन उदाहरणानि उपस्थाप्यन्ते अनुप्रासालङ्कारस्य। तद्यथा -

’’पश्यन्त्येते यदखिलजना मत्सुतं सद्वधूकं
बद्धस्पर्धं प्रकटकुतुकस्फारचक्षुर्विलासाः।
तत्किं भाग्याभ्युदयपदवीं सोऽहमद्याधिरूढः ?
किं वा पुत्रः प्रसभसुभगम्भावुकाभङ्गभाग्यः[30]।। 2/5’’

अस्मिन् श्लोके ’प्रसभसुभगम्भावुकाभङ्गभाग्यः’ इत्यत्र अनुप्रासो विद्यते। भकारस्य आवृत्तिः भवति।

’’आदौ सद्भर्तृवाञ्छा तदनुरुचितराः कल्पसंकल्पनास्ता-
स्तद्भोगाभोगलिप्सा प्रतिदिवसमतोऽपत्यभावाभिलाषः।
इत्थं संपूर्णकामा अतनुसुतनुजोद्वाहहर्षातिरेका -
न्नृत्यन्ति स्कन्धदेशोपरि विधृतसुतास्तारतारं तरूण्यः[31]।। 2/12’’

श्लोकेऽस्मिन् ’कल्पसंकल्पनाः’ ’ तद्भोगाभोग’ ’ भावाभिलाषाः’ ’ सुतास्तारतारं तरूण्यः ’ इत्यादि स्थलेषु अनुप्रासस्य प्रभावो दृश्यते।

’’वात्यावर्तितवारिवारिधिमहावर्तातिगूढोल्लस-
न्मद्बुद्ध्यारचितप्रपञ्चपतितः कः कः क्षयं नो ययौ ?
काण्डीरप्रतिवीरविक्रमकथाकन्थाप्रथापावकं
त्यक्त्वैकं त्वमसंख्यसाहसवशप्रौढाभिमानोन्नतम्।। 6/29
क्षितिप्रथितपौरुषक्षतविपक्षपक्षस्थिति -
स्थिरस्थितयशोर्जुनीविहितविश्वविश्वम्भर ।
परद्रविणचौर्यतः कृतविराम । भद्रप्रभा -
प्रभास्वर ! शिवश्रियं श्रय सुतीव्रवीरव्रतात्[32]।। 6/42’’

इति। सन्दर्भेऽस्मिन् ’वात्यावर्तितवारिवारिधिमहावर्तातिगूढोल्ल-सन्’ ’ काण्डीरप्रतिवीरविक्रमकथाकन्थाप्रथापावकं’ ’क्षितिप्रथितपौरूषक्षतविपक्षपक्षस्थितिस्थिरस्थितयशोर्जुनीविहितविश्वविश्वम्भर ’ इति स्थलेषु अनुप्रासो दृश्यते। अनेन प्रकारेण कानिचन अनुप्रासालङ्कारस्य उदाहरणानि उपस्थापितानि।

**यमकम्**- ’सत्यर्थे पृथगर्थायाः स्वरव्यज्नसंहतेः।
क्रमेण तेनैवावृत्तर्यमकं विनिगद्यते[33]।। 10/8

इति यमकालङ्कारस्य लक्षणमुक्तं साहित्यदर्पणकारेण। अर्थे सति (क्वचित् द्वयोरपि पदयोः सार्थक्यं क्वचिन्नैरर्थ्यं क्वचिदेकस्य सार्थक्यमपरस्य नैरर्थ्यम्) पृथगर्थायाः भिन्नार्थायाः स्वरव्यञ्जनसंहतेः स्वरव्यञ्जनसङ्घस्य तेन एव क्रमेण प्राक्स्थितक्रमेण आवृत्तिः आवर्तनम् (पुनरुक्तिः) यमकम् यमकालङ्कारो निगद्यते।

सम्प्रति नाटकाधारेण यमकालङ्कारस्य प्रयोगो विलिख्यते। तद्यथा -

’’सत्यं सन्त्येव शीतांशुसंगीतवनितादयः।
धुर्यं किमपि माधुर्यं रामभद्रगिरां पुनः[34]। 1/6’’ इति

अस्मिन् श्लोके ’धुर्यं किमपि माधुर्यम्’ इत्यत्र यमकालङ्कारो विद्यते।

**सङ्करः**- यत्र एकस्मिन्नेव श्लोके अलङ्कारद्वयं भवति तत्र सङ्करालङ्कार उच्यते। द्वित्राणि उदाहरणानि सन्ति नाटकेऽस्मिन्। यथा-

’’येनात्यद्भुतसाहसैकनिधिना वीरावलेपच्छिदाऽ-
लङ्कर्मीणपराक्रमेण जगतीमुल्लघ्यमानां मुहुः।
दर्शं दर्शमहर्निशं भगवती दुग्धाम्बुधेरात्मजा
मन्ये तद्भयभङ्गुरेयमुररीचक्रेचिराच्चापलम्[35]।। 1/8’’

अस्मिन् श्लोके ’दर्शं दर्शमहर्निशं भगवती दुग्धाम्बुधेरात्मजा ’ इति पङ्क्तौ यमकालङ्कारः , ’मन्ये तद्भयभङ्गुरेयमुररीचक्रे चिराच्चापलम्’ इत्यत्र च विभावनालङ्कारो विलसति। अतः सङ्करालङ्कारो अस्मिन् श्लोके विद्यते इति वक्तुं शक्यते।

’’कार्यसिद्धिर्विनार्थेन विनास्त्रैर्द्विषतां वधः।
अचिन्त्यमहिमा कोऽपि प्रपञ्चो धीमतामहो[36]।। 4/12’’

प्रस्तुतश्लोके ’कार्यसिद्धिर्विनार्थेन विनास्त्रैर्द्विषतां वधः ’ इत्यत्र विभावनालङ्कारो दृश्यते। ’अचिन्त्यमहिमा कोऽपि प्रपञ्चो धीमतामहो’ इति पङ्क्तौ अर्थान्तरन्यासालङ्कारस्य लक्षणं प्रतिभाति। अतः श्लोकेऽस्मिन् सङ्करालङ्कारो विद्यते इति वक्तुं शक्यते।

अनेन प्रकारेण प्रबुद्धरौहिणेयनाटकस्य श्लोकेषु विद्यमानानामलङ्काराणां निदर्शनमत्र कृतम्। सर्वत्र श्लोकेषु अलङ्काराः स्युरेव इति नियमो नास्ति। अतः कानिचन निदर्शनाय उदाहरणानि प्रद त्तानि। नाटकेऽस्मिन् उपमायाः आधिक्येन प्रयोगो दृश्यते। ततश्च अनुप्रासालङ्कारस्य प्रयोगो विहितः नाटककारेण। इत्थञ्च उपमानुप्रासोत्प्रेक्षार्थान्तरन्यास - विभावनाविशेषोक्तियमककाव्यलिङ्गसङ्करालङ्काराः प्रामुख्येन विद्यन्तेऽस्मिन् नाटके।

**सन्दर्भसूची**


1 वामनशिवरामआप्टेशब्दकोश:
2 नाट्यशास्त्रम् 1/7/43
3 साहित्यदर्पण: 10/1
4 काव्यसूत्रवृत्ति: 1/1-2
5 काव्यप्रकाश: 8/67
6 जैनमुनिश्रीरामभद्रविरचितप्रबुद्धरौहिणेयमितिनाटकम्।
7 अलंकारसारमंजरी5/11
8 साहित्यदर्पण:10/15
9 प्रबुद्धरौहिणेयम् 1/10-11
10 प्र. रौ. 5/8
11 प्र. रौ. 6/34,6/41
12 अलंकारसारमंजरी. 5/29
13 अलंकारसारमंजरी 5/30
14 साहित्यदर्पण: 10/40-41
15 प्र. रौ.1/12
16 प्र. रौ. 2/12
17 प्र. रौ.5/38
18 साहित्यदर्पण:.10/62
19 प्र. रौ. 1/3
20 5/14
21 अलंकारसारमंजरी 5/77
22 प्र. रौ.1/20
23 अलंकारसारमंजरी
24 साहित्यदर्पण: 10/61-62
25 प्र. रौ.6/23
26 प्र. रौ.6/24
27 साहित्यदर्पण:6/67, प्र. रौ.3/31
28 प्र.रौ. 4/2,4/13
29 साहित्यदर्पण: 10/3
30 प्र.रौ.2/5
31 प्र.रौ.2/12
32 प्र.रौ.6/29,6/42
33 साहित्यदर्पण: 10/8
34 प्र.रौ.1/6
35 प्र.रौ.1/8
36 प्र.रौ.4/12